श्रीः

# संस्कृतोत्सवः - २०१६

ईशगुरुकृपया बेङ्गलूरुनगरस्थ-व्योम लिङ्ग्विस्टिक् लाब्स् फौन्डेशन् ( www.vyomalabs.in) तथा गीतगोविन्दसंस्कृतसङ्घः- (www.ggss.org.in) – इति संस्थाभ्यां सेप्टेमबरमासे २५ दिनाङ्के संस्कृतोत्सवः आचरितः । उत्सवेऽस्मिन् द्विशतच्छात्राः , पोषकाः , संस्कृताध्यापकाः, संस्कृतिहितेच्छुकाः सार्वजनिकजनाः च भागं स्वीकृतवन्तः ।

क्षेत्रस्थ - ब्लूबेल शालाजनैः सह मिलित्वा गीतगोविन्दसंस्कृतसङ्घच्छात्राः अत्युत्साहेन संस्कृत-प्रदर्शिनीम् आयोजितवन्तः ।

संस्कृत-ग्रन्थालयः, रामायणपठनम्, भारतीय-इतिहासः, व्याकरणस्फोरकाः, संस्कृते विज्ञानम् , सन्धि-समासविषयेषु संस्कृतसङ्गणकक्रीडाः, अमरकोष-अष्टाध्यायीकथनं, संस्कृतवस्तुप्रदर्शिनी द्वारा शब्दसम्पद्वर्धनं, संस्कृतम् अध्येतुं सङ्गणकक्रीडाः च वस्तुप्रदर्शिन्यां अभूवन् । जनाः क्रीडाद्वारा आनन्दम् अनुभूतवन्तः । संस्कृतविधिकानां अवारोपणं ( downloaded apps) कृत्वा जनाः विशेषपारितोषकं प्राप्तवन्तः ।

मुख्यातिथयः ज्येष्ठ-श्रेष्ठ-न्यायवादी श्रीराघवेन्द्रराव् महाभागाः स्वोपस्थित्या सभाम् अलङ्कृतवन्तः । पूर्णप्रमतिशालायाः अध्यापकः डा श्रीधरः, सुरसरस्वतीसभायाः निदेशकः डा सुरेशः, अदम्यचेतना-समाजसेवकः श्री वी जी भट्टः च विशेषातिथिरूपेण समागताः । कार्यक्रमे अनेकविशेष-तन्त्रांशानां लोकार्पणं अभूत् - यथा

१) संस्कृतम् प्रथमः स्तरः – २५० कीडासमायुक्त-कौशलाधारित-तन्त्रांशः ( Skill based , fun filled Sanskrit learning )
२) संस्कृतशब्दसम्पद्वर्धिनी – ( Sanskrit Vocabulary Builder)

३) संस्कृतभाषा-प्रयोगालयः ( Sanskrit Language Labs)

मध्ये मध्ये छात्राः सांस्कृतिककार्यक्रमैः जनान् रञ्जितवन्तः । व्योम लिङ्ग्विस्टिक् लाब्स् फौन्डेशन् – संस्थायाः नूतनान्तर्जालसस्य (www.digitalsanskritguru.com) लोकार्पणं अभूत् । Gift a Geetha ( भगवद्गीताप्रदानद्वारा गीतायाः प्रचारः) इत्यस्यापि लोकार्पणं अभूत् ।

सुसन्दर्भेऽस्मिन् भाषमाणेन मुख्यातिथिना “संस्कृतपठनेन जीवनकौशलानि ( life skills ) प्राप्तुं शक्यन्ते” इति स्वानुभवकथनद्वारा जनाः प्रेरिताः ।

कार्यक्रमस्य अभिमुदितसाक्षात्कारः http://livestream.com/shaalelive/vyoma इत्यत्र प्राप्तुं शक्यते ।

वन्दे संस्कृतमातरम्

इति शम् ।